Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 3 | ISSN : 2581- 6306

# वैयाकरणवृचि शक्तिलक्षणा व्यञ्जनारुपश्च चिन्तनम्

डॉ. सांवरिया लाल शर्मा
व्याकरणाचार्यः, अध्यापक,
राजकीय बालिका उच्च प्राथमिक विद्यालय,
सदारा केकड़ी , अजमेर,
राजस्थान,भारत।



**Article Info**
Volume 4, Issue 3
Page Number : 33-55
**Publication Issue :**
May-June-2021
**Article History**
Accepted : 01 June 2021
Published : 15 June 2021

**सारांशः**– "गतोऽस्तमर्कः" इत्यादिवाक्ये "अर्कः अस्तं गत" इत्यस्य मुख्यार्थस्य बाधाभावेऽपि ब्रह्मचारिणं प्रति गुरुणा प्रोक्तस्यास्य वाक्यस्यार्थः "सन्ध्या वन्दनकालः समुपागत" इति। परञ्च वक्तृभेदाच्चोररूपवक्त्रोद्यमानाच्चौरकर्मकालः इति भिन्नार्थबोधः साहित्यकानां कृते तु व्यञ्जनावृत्तिर्हृदयमेव। अतो वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य प्राधान्यं काव्यस्य उत्तमत्वं साहित्यिकैरङ्गीक्रियते। वाच्यार्थस्य गौणत्वे तु काव्यस्य मध्यकाव्यत्वम्। व्यङ्ग्यार्थस्य राहित्ये तु काव्यस्य अधमत्वं तैरङ्गीक्रियते। अस्मिन् विषये काव्यप्रकाशादौ विस्तृतं प्रोक्तं, प्रकृते च तस्य विवेचनं नोपयुक्तम्।

**मुख्यशब्दः**– वैयाकरणवृचि, शक्तिलक्षणा, व्यञ्जना, वाक्यस्यार्थः, काव्यप्रकाशः, शाब्दबोधः, हेतुः।

वृत्तिलक्षणं चित्रनम् - शाब्दबोधं प्रति वृत्तिज्ञानं कारणं भवति। येषां पदानामर्थनिरूपिवृत्तिज्ञानं नास्ति ततः पदार्थोपस्थितिः शाब्दबोधश्च न जायते। वृत्तिश्च दाह प्रति वन्यादिवन्न स्वरूपेण हेतुः तस्याः स्वरूपतः सर्वत्र सत्त्वात् सर्वेषां बोधापत्तिरिति ज्ञाताया एव तस्याः हेतुत्वमभ्युपेयम् तत्तत्पदनिष्ठवृत्तिज्ञानशून्यस्य पुरुषस्य तत्तत्पदश्रवणेऽपि बोधानुदयात्। शब्दश्रवणमात्रेण सर्वेषां बोधो न भवति अतस्तत्तविषयकशाब्दबोधं प्रति तन्निरूपितवृत्तिज्ञानस्य कारणत्वं स्वीकृतम्। तेन पटत्ववद्विषयकबोधे पटत्ववन्निरूपितवृत्तिज्ञानस्य हेतुत्वान्न पटपदात् घटादिबोधः । गुडपदेन गुडप्रकारकबोधस्यैव दर्शनात् मधुरत्वाद्यनेकधर्मसत्वेऽपि गुडत्वप्रकारिकैव गुडपदे वृत्तिः न मधुरत्वादिप्रकारको बोधः। तदुक्तं मञ्जूषायाम्- अत एव 'न हि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यते' इति समर्थसूत्रं भाष्यं सङ्गच्छते। गुडादिशब्देन गुडत्वजात्यवच्छिन्नो गुडपदवाच्य इत्येव बोधो जातिप्रकारकः । मधुरत्वं तु 'गुडो मधुर ऐक्षवत्वाद्' इत्यनुमानान्तरगम्यम्।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

नैयायिकैः शाब्दबोधं प्रति वृत्तिज्ञानं पदज्ञानं च स्वातन्त्र्येण कारणमुक्तं परन्तु पृथक-पृथक् तयोः शक्तिस्वीकारे कार्यकारणभावद्वयकल्पने महद् गौरवं स्यादिति लाघवाद् विशिष्टस्य कारणत्वं शाब्दिकैः स्वीक्रियते। तदुक्तं परमलघुम ञ्जूषायाम्-तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपि तवृति विशिष्ट ज्ञानं हेतुः इति।[1]

ज्ञाने वृत्तिवैशिष्ट्यञ्च स्वविषयकोदबुद्धसंस्कारसामानाधिकरण्यस्वाश्रयप दविषयकत्वोभयसम्बन्धेन बोध्यम् ।[2] एवञ्चोक्तरीत्या तत्तत्पदादिनिष्ठशक्तिज्ञानं जायते। तेन च शक्तिविषयकः संस्कारो जन्यते। स च संस्कारः श्रावणप्रत्यक्षविषयीभूतपदरूपोद्बोधकवशादुबुद्धः सन् स्वविषयशक्तिविषयिणीं स्मृतिं जनयति। स्मृता च शक्तिः पदार्थविषयकं ज्ञानमुत्पादयति। तदेव ज्ञानं स्मृतिरूपोपस्थितिः ज्ञानान्तरं वाऽभिधीयते। उपस्थितिरूपज्ञानाच्छक्तिविषयक संस्काराद् वा आकांक्षादिकारणान्तरसत्वे शाब्दबोधो जायते। यथा च यस्य यत्पदे वृत्तिज्ञानं जातं तस्य तत्पदे वृत्तिः स्वविषयकसंस्कारद्वारा विषयतासम्बधेन सम्बन्धितया वा वर्तते इति वृत्तिवैशिष्ट्यं ज्ञाने सुलभम् । अयं भावो यत्र पदस्य श्रावणप्रत्यक्षादिकं वृत्तेश्च स्मरणात्मकं ज्ञानं तत्र विषयता वृत्तिज्ञानं पदज्ञानं च पदरूपे विषये वर्तते, उभयोरपि पदविषयकत्वाद् इति सामानाधिकरण्यं सुलभम् । घटपदे गृहीतवृत्तिकस्य कलशपदेन शाब्दबोधवारणाय पदरूपदेशमादाय सामानाधिकरण्यम्। उक्तकार्यकारणभावादेव नागृहीतवृत्तिकस्य नापि विस्मृतवृत्ति कस्य, नापि तत्पदमजानतो, नापि घटपदाश्रय- त्वेनोपस्थितस्याकाशादेः नापि जनकतनया चैत्रादेश्च बोधः इत्युक्तं मञ्जूषाग्रन्थे। संस्काराजनकशक्तिग्रहसत्वे तेन शाब्दबोधजनने च न मानम्। वैयाकरणनये स्मृति प्रति संस्कारस्य कारणत्वेन कारणमन्तरा कार्यस्यानुत्पादात् व्याप्यभूतस्मृत्या व्यापकस्य संस्कारस्यानुमानमेव कल्पनमत्र बोध्यम्। संस्कारकल्पिकावृत्तिस्मृतिरेव शाब्दबुद्धिरेव वा। एतेन यत्र क्षणे वृत्तिज्ञानं तदव्यवहितोत्तरक्षणे शाब्दबोधो न स्यात् तदानीं संस्कारस्यानुत्पन्नत्वात् द्वितीये क्षणे संस्कारोत्पत्तेः सर्वसम्मतत्वादितिदूषणाभासोऽप निरस्तः। शब्दोऽत्र हेतुत्वज्ञापके चार्थे एवञ्च शाब्दबोधरूपकार्येण साधनेन स्मृतिरनुमीयते, स्मृत्या च साधनेन संस्कार साध्यते।

सा च वृत्तिस्त्रिधा-शक्तिर्लक्षणाव्यञ्जना च। एवञ्च शक्ति लक्षणाव्य जनात्वधर्मत्रयविशिष्टा वृत्तिरिति निष्कर्षः। इदमत्राकूतम्- शाब्दबोधनिष्ठ कार्यतानिरूपित-शक्तिज्ञाननिष्ठकारणता एकरुपेणैव शक्तिरूपसम्बन्धवृत्तिविषय तानिरूपितपदनिष्ठप्रकारतानिरुपितार्थनिष्ठविशेष्यतानिरूपकत्वेन पदप्रकारकर्थवि शेष्यकज्ञानस्य। "शक्तिसम्बन्धेन पदविशिष्टोऽर्थः" शक्तिनिरूपकत्वसम्बन्धेन पदविशिष्टोऽर्थ इत्याकारकोऽयमत्र ज्ञाने शक्तौ संसर्गताख्यविषयताया अक्षतत्वात् । एवञ्च धर्मत्रयविशिष्टा वृत्तिरिति विवेकः । किरणावल्यां वृतिलक्षणन्तु पदार्थस्मृ त्यनुकूलत्वे सति पदपदार्थसम्बन्धत्वम्। पदार्थस्मृत्यनुकूलत्वानुपादाने "घट" पदकम्बुग्रीवादिमदात्मकार्थयोः पृथिव्यादौ यः कालिकसम्बन्धस्तत्रातिव्याप्तिः, पदार्थस्मृत्यनुकूलत्वोपादाने तु वृत्यात्मकसम्बन्धतिरिक्ता ये कालिकादिसम्बन्धास्ते न शाब्दबोधजनकपदार्थस्मरणानुकूला इति

तद्वारणम्। अर्थस्मृत्यनुकूलस्य अदृष्टादौ सत्वादतिव्याप्तिः, तद्वारणाय पदपदार्थसम्बन्ध इति। अदृष्टादिकं न पदपदार्थसम्बन्ध इति तद्वारणकमित्युक्तम्।

शक्तिस्वरूपविवेचनम् - तत्र शक्तिः पदार्थः कः इति जिज्ञासायां नैयायिकास्तावद् "अस्माच्छब्दादयमर्थो बोद्धव्यः" इत्याकारा "इदं पदमिमर्थं बोधयतु" इत्याकारा वेश्वरेच्छा इति ब्रुवन्ति। इत्थम् इदमर्थविषयकबोधजनकतावदिदं पदं भवतु इत्याकारिका अर्थप्रकारकशब्दविशेष्यकेश्वरेच्छा, इदमर्थनिष्ठप्रकारतानिरूपिताविष यत्वनिष्ठप्रकारतानिरूपितबोधनिष्ठप्रकारतानिरूपितजनकत्वनिष्ठप्रकारनिरूपित विशेष्यताश्रयः पदमिति बोधः। एवं बोधविशेष्यिका विषयताविशेष्यिका नानाविधे श्वरेच्छा विनिगमनाविरहात् कल्पनीया। न च आधुनिके नाम्नि शक्तिर्नास्तीति वाच्यम् "एकादशेऽहनि पिता नाम कुर्यादितीश्वरेच्छायास्तत्रापि सत्वात्। अतः आधुनिकैः पित्रादिभिः एकादशे दिवसे उच्चारिते नाम्नि अपि ईश्वरेच्छात्मिका शक्तिरेवेत्यर्थः । एकादशाहः कालीनपुत्रबोधकनामत्वावच्छिन्नोच्चारणकर्ता पिता इति श्रुतिवाक्यार्थः। आधुनिकसङ्केतिते तु न शक्तिरितिसम्प्रदायः।

ज्ञानेच्छादीनां सविषयाणां विषयतासम्बन्धेन वर्तमानात् विषयतासम्ब न्धेनेच्छावत्त्वं वाचकत्वं, वाच्यत्वञ्च वक्तव्यम्, तादृशस्य वाचकत्वस्य वाच्यत्वस्य च पदे सम्बन्धेऽर्थे बोधे सर्वत्र सत्वात् वाच्यवाचकभावस्य व्यवस्था न स्यात् । ईश्वरच्छाविषयबोधनिष्ठजन्यतानिरूपितजनकताख्यविषयताश्रयत्वसम्बन्धेनेच्छावत्त्वं वाचकत्वम् । इच्छीयबोधनिष्ठविषयितानिरूपितविषयतावत्वेनेच्छावत्वं वाच्यत्वमिति न सम्बन्धादौ वाचकत्वलक्षणातिव्याप्तिः, अत आह मञ्जूषायां-शक्तेः यद्यपि विषयत्वलक्षणः, सम्बन्धः पदेऽर्थे बोधे च तथापि बोधनिष्ठजन्यतानिरूपितज नकतावत्त्वेन शक्तिविषयो वाचकः, पदजन्यबोधविषयत्वेन शक्तिविषयो वाच्य इति नातिप्रसङ्गः। इतिनव्यन्यायसिद्धान्तः।।

तदेतन्मतं वैयाकरणेभ्यो न रोचते। तथाहि घटमानयेत्यादि श्रुतवता प्रयोज्येनातीतं घटं पश्यन् बालोऽनुमिमीतेऽयं घटानयनकार्यताज्ञानवान् घटाविष यकचेष्टाविषयत्वात् यो यविषयकचेष्टावान् स तद्विषयकज्ञानवान् यथा अश्वारोहणविषयकचेष्टावान् अश्वारोहणविषयकज्ञानवान् तथा चायं प्रयोज्यवृद्धोऽ पीति अयमपिघटानयनविषयकज्ञानवानिति ततश्चेदं प्रयोज्यवृद्धज्ञानं घटमा नयेति वाक्यजन्यम्, तदवाक्यश्रवणाव्यवहितोत्तरत्वमेव जातत्वादित्यनुमानेन तस्मिन् वाक्ये तज्जन्यजनकत्वं निश्चीयते। ततः आवापोद्वापाभ्यामन्वयतिरेकेण च सहचारेण पदेऽपि बोधजनकत्वं निर्धार्यते। आवापः= निक्षेपः, उद्वापो निष्कासनम् यथा घटमानय पटमानय, इत्यादौ निक्षेपनिष्कासने। तच्चेदं पदे वाक्ये वा बोधजनकत्वं पदस्य वाक्यस्य वाऽर्थेन सह सम्बन्धाभावे विषयेण घटादिना सह सम्बन्धानामेव चक्षुरादीनां बोध जनकत्वदर्शनात्। न हि घटेन सम्बन्धेन विना चक्षुरादीन्द्रियं तज्ज्ञानं जनयितुं प्रभवति।

किञ्चेच्छाया जनकत्वस्य वा उभयवृत्तित्वाभावः। इच्छाविषयबोधीयविषयतायाम् इच्छाश्रयतानियामकत्वाभावात्।

अस्यायं भावः- ईश्वरेच्छायाः शक्तित्वं तदेव स्यात् यदा तस्याः सम्बन्धत्वं स्यात् शाब्दबोधोपयिककत्वे सति सम्बन्धत्वस्यैव वृत्तित्वस्वीकारात् । सम्बन्धत्वञ्चाधाराधेयभावनियामकस्यैव दृष्टं सर्वसम्मतञ्च। अत्र चेच्छीयविषयताश्रयबोधनिष्ठजन्यतानिरूपितजनकत्वाख्यविषयतासम्बन्धेन “अयमर्थः” अयं च शब्दः इच्छावानिति व्यवहारादर्शनात् तस्याः सम्बन्धत्वकल्पनं मनोरथमात्रमेव स्यात्। “सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे सति आश्रयतया विशिष्टबुद्धिनियामकः” इत्यभियुक्तव्यवहारात्। यथा घटवद्भूतलमित्यादौ संयोग रूपः सम्बन्धः सम्बन्धिभ्यां भिन्नो द्विष्ठो घटनिरूपित संयोगाश्रयो भूतलमिति विशिष्टबुद्धिनियामकः नात्र तथा घटशब्दः इच्छावान् तदर्थो वा इच्छावानिति व्यवहारः।

तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यं तच्च सङ्केतः तदेव सम्बन्धः । उभयनिरूपिततादात्म्यवानुभय इत्यर्थपदयोर्व्यवहारात्। शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियामकत्वात्। तस्मादितरेतराध्यासः सङ्केतः तन्मूलकतादात्म्यञ्च सम्बन्ध इति सङ्घातार्थः। तदुक्तं पातञ्जलभाष्ये– “सङ्केतस्तु पदपदार्थ तयोरितरेतराध्यासरूपः स्मृत्यात्मको सोऽयं शब्दः सोऽर्थो योऽर्थः सः शब्दः” इति।

सम्बन्धश्च स्वशक्तसङ्केतितविषयत्वम् एतदर्थमेव सङ्केतोपयोगः । अतः एव भाष्यकारोऽपि तादात्म्यसम्बन्धस्यैव शक्तित्वं दर्शयन् “वृद्धिरादैच्” इति सूत्रे ब्रवीति द्वयोरेव सामानाधिकरण्यम् विशेषणविशेष्ययोर्वा इति। अत्रैवोद्योतकारः स्पष्टं ब्रूते “तादात्म्यमेव शब्दार्थयोः शक्तिरिति ।” एवञ्च तादात्म्यसम्बन्धस्यैव शक्तित्वं पर्यवस्यति। यथा पीतो घट इत्यत्र तादात्म्यसम्बन्धेन पीतविशिष्टो घट इति बोधः । तथैव "वृद्धिरादैच" इत्यत्रापि तादात्म्यसम्बन्धेन वृद्धिपदविशिष्ट “आदेच्” इति श्रुतबोधः। किमिदं तादात्म्यमिति चेदत्रोच्यते तभिन्नत्वे सति तदभेदेन प्रतीयमानत्वमेव तादात्म्यस्य स्वरूपं सिद्धान्तितं शाब्दिकमते। तत्र शब्दस्यार्थे भेदो वास्तवः अभेद: आरोपित इति न भेदाभेदयोरेकत्र विरोधः । ध्वनितं चेदं वाक्यपदी यटीकायां हरिवृषभेण "बुद्धया गृहीतार्थप्रतिपादनाय शब्दप्रयोगादर्थः शब्दस्य निमित्तम् कार्यकारणयोश्चाभेदाध्यवसायात् सोऽयमिति प्रतीयमानं तादात्म्यम्।”

तदेवोक्तं हरिणा -

ज्ञानं प्रयोक्तुर्बाह्याऽर्थः स्वरूपञ्च प्रतीयते।

शब्दरुच्चरितैस्तेषां सम्बन्धः समवस्थितः॥[3] इति।

अत एव “घटः” इतिज्ञानम् इति “घटः” इति पदम् “घटः” इत्यर्थ इति समानाकारत्वेन शब्दार्थज्ञानानां व्यवहारो जायत एव । भेदाभेदात्मकस्य तादाम्यस्य स्वीकारादेव गुड इत्युक्ते न माधुर्याद्यनुभवापत्तिः न वहिनशब्दोच्चारणे मुखदाहाद्यापत्तिः। तच्च

तादात्म्यं सङ्केते एव। एवञ्च शब्दार्थयोः कथञ्चिद्भेदसत्वे एव न मुखदाहाद्यापत्तिः। अभेदे तु घटतदर्थयोरभेदव्यवहारः योऽयं घट: शब्दः योऽयं घटरूपोऽर्थः । एवञ्च इतरेतराध्यासमूलकं यत्तादात्म्यं वर्तते तत्ज्ञानादेव वाच्यवाचकभावरूपसम्बन्धस्य ज्ञाने जाते शब्दार्थप्रतीतिर्भवति । तत्र शब्दार्थयोर्भेदो नैयायिकेभ्य एव रोचते। अभेदस्तु इतरेषाम्। वाक्यपदीयकारो भर्तृहरिस्तु -

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।

अनादिरथैः शब्दानां सम्बन्धो योग्यता तथा॥[4] इति ।

चक्षुरादीनामिन्द्रियाणां स्वविषयेषु घटादिषु यथाऽनादियोग्यता शब्दानामप्यर्थैः सह तद्बोधकारणतैव योग्यता सैव शक्तिः इति कारिकार्थः। अनया कारिकया बोधजनकत्वरूपा योग्यतैव शब्दनिष्ठाशक्तिरिति स्वीक्रियते। शक्तिरिह सामर्थ्यम् । यथा दीपादौ तेजसि ग्राह्यत्वं ग्राहकत्व सामर्थ्यस्वरूपं सदेवोपयुक्तं न तु ज्ञातम् । तदुक्तं हरिणा -

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।

तथैव सर्वशब्दानामेते पृथगवस्थिते ॥[5] इति।

यथा तेजसः प्रतीपादेः ग्राह्यत्वं ज्ञानविषयत्वं ग्राहकत्वं घटादिविषयक ज्ञान जनकत्वं च द्वे ग्राह्यत्वग्राहकत्वरूपे शक्ती स्तः तथैव सर्वशब्दानां ग्राह्यत्वं ग्राहकत्वं द्वे शक्ती। शब्द एव प्रकाशयन्नर्थं प्रकाशयतीति यावत्। यद्यपि घटे ग्राह्यत्वमेव न ग्राहकत्वम् इन्द्रियेषु ग्राहकत्वमेव न ग्राह्यत्वं ग्राहकत्वञ्च स्वभावादिति तात्पर्यम् । शाब्दिकमते सर्वेषां नानार्थत्वम् । अत एव वृद्धिरादैजिति सूत्रे भाष्ये अनेकशक्तेः शब्दस्येत्युक्तम् शब्दकौस्तुभादावपि घटादौ घटबोधजननसामर्थ्यादिव घटादिपदानां शक्तिर्युत्पादिता। परं सा शक्तिः सम्बन्धेन शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियामकत्वान्न पदपदार्थयोर्बोधबोधकभावनिया मिकाशक्तिरेव सम्बन्धः। दीपादिगतप्रकाशत्वशक्तावपि सम्बन्धे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टतवात्! तदुक्तं हरिणा -

उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते।

शक्तीनामप्यसौ शक्तिः गुणानामप्यसौ गुणः॥[6] इति।

उपकार्योपकारकयोरुपकारस्वभावः सम्बन्धो यत्रास्ति धर्मः शक्तिरूपः कार्यं दृष्ट्वा अनुमीयते असौ सम्बन्धः शक्तीनामपि कार्यजनने उपकारकः गुणानामपि द्रव्याश्रितत्वनियामक: सम्बन्धः। कः शब्दः कोऽर्थः? इति प्रश्ने घट इत्ययं शब्दो घट इत्ययमर्थ इत्याकारोत्तरदर्शनात् तयोरध्याससिद्धिः । घट इत्याकारकं ज्ञानमिति व्यवहाराब्दज्ञानयोरपि सः इति शब्दस्य शब्दस्वरूपपरता तात्पर्यग्राहकत्वात्। अत एव पदं श्रुतं पदार्थ श्रृणु अर्थं वदतीति व्यवहार इति नागेशः ।

वैयाकरणभूषणसारमतेन तु बोधजनकत्वयोग्यत्वमेव शक्तिः। तादृशयो ग्यता बोधजनकतावच्छेदकत्वेनाभिमतो धर्मः । स च वाच्यवाचकभावरूपः । तत्र यथा लौकिकप्रत्यक्षस्थले चक्षुरादौ तत्कारणत्वनिर्वाहाय काचिदनादिशक्तिः कल्पिका भवति सा

शक्तिः सम्बन्धान्तरमधिकृत्यैव तत्प्रत्यक्षं जनयति। तथैव बोधजनकता वच्छेदकत्वेनाभिमतस्य धर्मस्य शाब्दबोधोपपत्तये सम्बन्धान्तरमपेक्षणीयं भवत्येव। तच्च सम्बन्धान्तरमुक्तप्रत्यक्षस्थले सन्निकर्षः शाब्दस्थले तु तादात्यम्।

इदमत्र बोध्यम् यथा बोधजनकतावच्छेदकत्वेनाभिमतस्य धर्मस्य ज्ञानार्थ सम्बन्धान्तरं तादात्म्यमपेक्षणीयं भवति न तु तादात्म्यस्य ज्ञानार्थम्, तन्मते तादात्म्य सम्बन्धः स्वाभाविकः स च पुरूषप्रत्यनानपेक्षोऽकृत्रिम एव।

वस्तुतो बौद्ध एवार्थः शक्यः पदमपि स्फोटात्मकं प्रसिद्धम् तयोस्तादात्म्यम्। तत्र बौद्धे वन्यादावर्थे दाहादिशक्तिमत्वाभावात्। अत एव "शब्दज्ञानानुपाती वस्तुशून्यो विकल्प" इति विकल्पसूत्रं सङ्गच्छते। शब्दज्ञानमात्रेणानुपाती बुद्धावनुपतनशीलो वस्तुशून्यबाह्यार्थरहितः विशेषेण कल्प्यते इति विकल्पः बुद्धिपरिकल्पितः इति तदर्थः। अत एव –

एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।

कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः॥[7]

इत्यत्र वन्ध्यासुतादीनां बाह्यार्थशून्यत्वेऽपि बुद्धिपरिकल्पितं वन्ध्यासुतशब्द वाच्यार्थमादायार्थवत्वात्प्रातिपदिकत्वम्। अन्यथाऽर्थवत्वाभावेन प्रातिपदिकत्वाभावात् स्वाद्युत्पत्तिर्न स्यात्।

यत्तु शशशृङ्गमित्यत्र शृङ्गे शशीयत्वभ्रम एव तार्किकैरुक्तम्। तन्न शशशब्दवाच्यजन्तुदर्शनरूपबोधे सति शशशृङ्गं नास्तीति वाक्ये शश शृङ्गमित्यस्य प्रातिपदिकत्वानापत्तेः। अस्यायमाशयः-शशशब्दवाच्यस्य चतुष्पाद जन्तुविशेषस्य दर्शनरूपबाधसत्वेन एकदेशस्य आनर्थक्येन विशिष्टार्थवत्वाभावेन प्रातिपदिकत्वं न स्यादिति बोध्यम्। अर्थपदयोस्तादात्म्यात्तत्तदर्थतादात्म्यापन्नः शब्दो भिन्न इति हेतोरर्थभेदाच्छब्दभेद इति व्यवहारः। समानाकारमात्रेण तु एकोऽयं शब्दो बह्वर्थ इति व्यवहारः। समानाकार इत्यस्यानुपूर्व्या एवैक्येन शब्दैक्यव्यवहार इति तात्पर्यम्।

शक्तिग्राहकत्वचित्रनम्

शक्तिग्राहकञ्च

शक्तिग्रहं व्याकरणोपमानकोशाऽऽप्तवाक्याद्व्यवहारतश्च।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥[8] इति।

तत्र व्याकरणं-शब्दशास्त्रम् उपमानं सादृश्यज्ञानात्मकप्रमाणम् कोशा अमरकोशनिघण्ट्वादिः, आप्तवाक्यं प्रयोगहेतुभूतयथार्थज्ञानवत्पुरूषोच्चरितवाक्यम्, व्यवहार: शब्दप्रयोगः प्रयोज्यवृद्धिमुदिद्श्य उत्तमवृद्धादिकृतो गामानयेत्यादिरूपः चेष्टाद्यात्मकः, वाक्यस्य शेषः प्रकृतवाक्यातिरिक्ते वाक्ये प्रकृतवाक्यार्थबोधोपयोगी पदकदम्वोऽर्थवादाद्यात्मकः विवृतिः

विवरणम्-पर्यायादिकम्, सिद्धपदस्य सान्निध्यम् प्रसिद्धपदस्य सन्निद्धि, एतान्यष्टौ शक्तिज्ञानस्य प्रयोजकानि भवन्तीति वृद्धा वदन्ति इति कारिकार्थः।

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति। तद्यथा-"वर्तमाने लट्-इत्यत्र लट्प्रत्ययानां वर्त्तमानेन रूपार्थे शक्तिग्रहः । "लः कर्मणि च भावे चाकर्मकेभ्यः" इत्यादि व्याकरणबलाद् आख्यातस्य तिप्रभृतेः कर्तरि शक्तिः । तदुक्तम् -

आश्रयोऽवधिरूद्देश्यः सम्बन्धः शक्तिरेव वा।

यथायथं विभक्त्यर्थः सुपां कर्मेति भाष्यतः॥[9] इति ।

तत्र व्याकरणादिकं लाघवसहकृतमेव शक्तिग्राहकमिति नैयायिकमतम् । यतो लाघवसहकृतेन "लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रेण कृतावेव शक्तिः परिच्छिद्यते न तु कर्तरीति यथैतत्तथोक्तम्। उपमानाद् यथा "गोसदृशो गवयः" गवय पदमजानन् कश्चिद् ग्रामीणः आरण्यकात् पुरुषात् "गोसदृशो गवयः" इति वाक्यं श्रुत्वा उपमानाद् गवयपदार्थ जानाति। एवम् कोशादपि शक्तिग्रहो भवति "गुणे शूक्लादयः" इति कोशेनापि लाघवसहकृतेन गुणे एव शक्तिनिर्धार्य्यते न गुणिनि गौरवात् । गुणिबोधस्तु शुक्लादिपदेभ्यो निरूढलक्षणैवेति तदुक्तेः ।

एवमाप्तवाक्यादपि- यथा "कोकिलःपिकपदवाच्यः" इत्यादि शब्दात् पिकादिपदानां कोकिले शक्तिग्रहः ।

एवं व्यवहारदपि- तथाहि घटमानयेति श्रुतवान् बालो प्रयोज्येनातीतं घटं पश्यन् घटायनरूपं कार्यं घटमानयेति शब्दप्रयोज्यमित्यवधारयति। ततश्च घटं नय गां बधानानेत्यादिवाक्यादवापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति।

एवं वाक्यस्य शेषादपि- वाक्यस्य शेषादपि शक्तिग्रहः। यथा यवमयश्चरूर्भवति इत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः, कङ्गौ तु म्लेच्छानाम् । तत्र हि -

यदान्या ओषधयो म्लायन्तेऽथैते मोदमानास्तिष्ठन्ति ।

वसन्ते सर्वसस्यानां जायते पत्रशातनम् ।

मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः॥ इति।

इतिविध्यर्थाकाङ्क्षया प्रवर्तमानाद्वाक्यशेषाद्दीर्घशूकविषये एव यवपदस्य शक्तिग्रहः । एवं विवरणादपि- विवरणादपि शक्तिग्रहः विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकल्पनम् । यथा घटोऽस्तीत्यनेन विवरणाद्धटपदस्य कलशे शक्तिग्रहः। एवं पचतीत्यस्य पाकं करोति इत्यनेन विवरणादाख्यातस्य यथार्थकत्वं कल्प्यते। एवं प्रसिद्धपदस्य सान्निध्यादपि शक्तिग्रहः । यथा इह सहकारतरौ

मधुरं पिको रौति इत्यादौ पिकपदस्य कोकिले शक्तिग्रहः। शक्तिग्रहविषये शब्दशक्तिप्रकाशि काकारस्त्वाह शब्दशक्तिप्रकाशिकायाम्।

सङ्केतस्य ग्रहः पूर्व वृद्धस्य व्यवहारतः।

पश्चादेवोपमानाद्यैः शक्तिधीपूर्वकैरसौ॥[10] इति ।

तत्र हि प्रथमं पदेषु सङ्केतग्रहो वृद्धस्य व्युत्पन्नस्य शब्दाधीनव्यवहारादेव बालानाम्, ननु वृद्धस्य कुतः प्रथमतः शक्तिग्रहः इत्यतः आह तथाहि गामानयेति केनचिन्निपुणेन नियुक्तः कश्चन व्युत्पन्नस्तद्वाक्यतोऽर्थं प्रतीत्य गवानयनं करोति, तच्चोपलभमानो बाल इदं गवानयनं स्वगोचरप्रवृत्तिजन्ये चेष्टात्वान्मदीयस्तनपाना दिवादित्यनुमाय, सा गवानयनप्रवृत्तिः स्वविषयधार्मिककार्य्यताज्ञानजन्या प्रवृत्तित्वा निजप्रवृतिवदिति प्रवृत्तेर्गवानयनधर्मिककार्य्यताज्ञानजन्यत्वं प्रसाध्य, गवानयनगो चरतज्ज्ञानमसाधारणहेतुकं कार्य्यतवाद्धटवदित्येवमनुमिन्वान: प्रथममुपस्थिततत्वाल्ला घवाच्च श्रुतं वृद्धवाक्यमेव तदसाधारणकारणत्वेनावधारयति।

तदनन्तरञ्च गवादिपदानां प्रत्येकमावापोद्वापेन गवादिबुद्धौ जनकत्वमवगत्यानति प्रसक्तये गवादिसङ्केतस्य तदनुकूलत्वं कल्पयति।

कारिकापरार्द्ध व्याकुरुते पश्चात्तु क्वचित्-किञ्चिद्धर्मावच्छिन्ने उपमानाच्छक्तिग्रहः, शक्तिग्रहप्रकारमाह-यथा गवादिपदशक्तिधीसाचिव्येन गोसादृश्यातिदेशवाक्याद् गवयपदवाच्यत्वबोधोत्तरं गवयत्वजात्यवच्छिन्ने गोसादृ श्यग्रहात् गवयो गवयपदवाच्य इत्याकारः। व्याकरणाधीनशक्तिग्रहस्थलमाह क्वचिच्च व्याकरणात् कर्मत्वादित्यादिपदात् कर्तृत्वादिपरिग्रहः। यथा "कर्मणि द्वितीया" "कर्त्तरि परस्मैपदमि" त्याद्यनुशासनात् कर्मत्वादौ द्वितीयादेः ।

क्वचित् कोषादपि, यथा -

गुणे शुक्लादयः पुंसि गुणिलिङ्गस्तु तद्वति।

शीतं गुणे तद्वदर्थाः सुशीमः शिशिरो जडः ॥

चूर्णे क्षोदः समुत्पिञ्जपिञ्जलौ भृशमाकुले।

शक्तिभेदनिरूपणम्:- सा शक्तिस्त्रिधा रूढिर्योगो योगरूढिश्च। शास्त्रकृतकल्पिताव यवार्थमानाभावे समुदायार्थनिरूपितशक्ती रूढ़िः, सैव प्रकारान्तरेण वैयाकरणलघुमञ्जुषायां नागेशः शास्त्रकृतकल्पितावयावार्थाप्रतीतौ यदर्थनिरूपितं प्रकृतिप्रत्ययसमुदायमात्रे बोधकत्वं तत्पदे सा तदर्थनिरूपिता रूढिः यथा मणिनूपुरादौ। भ्वादिगणस्थशब्दार्थकमण् धातोरोणादिकः इन् प्रत्यये 'मणिः' इति ।

एवं 'णू' स्तुतौ नुवनं नू: सम्पदादिभ्यश्चेति 'क्विपि' नू: इति 'पुर्' अग्रगमने इत्यस्मात् इगुपधात् कप्रत्यये 'पुर्' इति नुवः पुरो नूपुरः अत्रेमौ शब्दो शब्दकर्तृरूपार्थस्तुतिसम्बन्ध्यग्रगमनकर्तारं वा बोधयतः परन्तु रत्नविशेष भूषणविशेष वेति रूढिशक्तत्वमनयोः।

शास्त्रकल्पितावयवार्थमानाभावे समुदायार्थनिरूपिता शक्तिः योगः यथा पाचकादौ इत्यत्र 'पच्' इत्येकः प्रकृतिरूपोऽवयवः ण्वुल् इत्यपर: प्रत्ययरूपोऽर्थः उभयावयवार्थः पाककर्ता इति बुध्यते। "अश्वगन्धापदम्" यौगिकम्। इदं यौगिकरूढमित्युच्यते। रूढिर्योगापहारिणी इति तु प्रकरणाद्यभावे बोध्यम्।

यत्र मण्डपपदादिभ्यो मण्डपानक देः रूढ्यर्थमण्डपादिगुणवत्वेन बोधः तत्र प्रथमप्रतीतरूढिविषयमुख्यार्थत्यागेन योगाद्रूढिपूर्वकलक्षणाया बलवत्वेन लक्षणयैव बोधः।

यत्र शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपितं समुदाये बोधकत्वं सा योगरूढिः यथा पंकजादिपदे, तत्र पंकजनिकर्तृपद्मम् इति बोधात्। पद्मस्यानुपपत्तिप्रतिसन्धानं सम्बन्धप्रतिसन्धानं च विना बाधान्न तत्र लक्षणावसरः। क्वचित्तात्पर्यग्राहकवशात् केवलरूढ्यर्थस्य केवल योगार्थस्य च बोधः "भूमौ पंकजमुत्पन्नम्" कहलारकैरवमुखेष्वपि पंकजेषु इत्यादौ स्पष्टञ्चेदं 'आर्हात्' इतिसूत्रे भाष्ये। अत्र किञ्चिद् विचार्य्यते

शक्तं पदमिति तार्किकाः। तच्च मानाभावात् फलाभावात् स्वग्रन्थविरोधाच्चायुक्तमिति शाब्दिकाः। तथा हि शक्तं पदं चतुर्दा रूढं यौगिक योगरूढमिति यौगिकरूढं चेति। गौः, पाचकः, पङ्कजम्, अश्वकर्णः इति क्रमेणोदाहरणानि। तत्र "पाचकः" इति यौगिकोदाहरणे यच्छक्तं पदं पच् अक इति न तद्यौगिकम् समुदायस्तु यद्यपि यौगिकस्तथापि न शक्तः। एवञ्च शक्तं पदं यौगिकमित्यविचारिताभिधानम्। विशिष्टशक्यभावे सति व्याकरणबोधितार्थप्रकृतिप्र त्ययसमुदायरूपसुबन्ततिङन्तपदत्वं यौगिकपदत्वम्। सत्यन्तं यौगरूढातिव्याप्ति वारणाय तत्र विशिष्टे शक्तिग्रहात्। एवं गौरिति रूढ्युदाहरणमप्यसङ्गतम्, व्याकरणकल्पितप्रकृतिप्रत्ययार्थप्रत्ययाभावे सति समुदायसुबन्तस्यार्थबोधकत्वे रूढपदत्वं यथा मणिनूपुरादीतिरूढिलक्षणानाक्रान्तत्वात्। शास्त्रकल्पितावयवार्थानु सन्धानपूर्वक समुदायशक्त्यार्थबोधकपदत्वं योगरूढत्वम्। यथा पङ्कजादीति। तदाक्रान्तत्वाद्योगरूढत्वं युक्तम्। यौगिकरूढ इति तार्किकोक्तो भेदोऽपि न युक्तः सकृदुच्चरितः सकृदर्थं प्रत्याययतीति न्यायान्मण्डपपदं गृहविशेष रूढं भिन्नं, मण्डपानकर्तरि भिन्नमिति अतिरिक्त भेदस्वीकारे मानाभावात्।

एवं रूढिलक्षणायाः कर्मणि कुशलः इत्युदाहरणमप्ययुक्तम्। उक्तरीत्या कुशले रूढत्वस्य कुशादानकर्त्तरि यौगिकत्वस्य सम्भवात्। द्विरेफपदं भ्रमरे रूढमेव, कोशे भ्रमरपर्याये उपादानात्। न हि कोशे लाक्षणिकोपादानं पर्यायेष्वस्ति। एवञ्च स्ववाच्यपदवाच्यत्वसम्बन्धेन द्विरेफपदस्य भ्रमरे लक्षणेति तार्किकोक्तमपास्तम्, अक्रूरेऽपि उक्तसम्बन्धसत्वेन तत्रातिव्याप्तेश्च उक्तञ्च शब्दशक्तिप्रकाशिकायाम् -

रूढञ्च लक्षकञ्चैव योगरूढञ्च यौगिकम्।

तच्चतुर्दा परैरूढयौगिकं मन्यतेऽधिकम्॥[11] इति।

रूढ-लक्षक-योगरूढ-यौगिकभेदाच्चतुर्विधं स्वमतेन, अन्यमतेन च रूढयौगिकमपि पञ्चममधिकं बोध्यमिति कारिकार्थः । किञ्चिन्नाम क्वचिदर्थे रूढमेव गोप्रभृतौ गवादि "गमे?दामाभ्यां नुर्धेट् इच्चेत्यादेरौणादिकप्रत्ययस्य शक्तिविरहेण यौगिककत्वायोगात्। किञ्चिल्लक्षकमेव यथा तीरादौ गङ्गादि, आद्यव्युत्पत्त्या पूर्वत्तीरे शक्तिग्रहस्याविशिष्टत्वेऽप्याजानिकप्रयोगापत्त्या तदप्रामाण्यकल्पनात् शक्तेः पूर्वपूर्वयोगनियतत्वात्। किञ्चिद्योगरूढमेव, यथा पङ्कजाते पद्मादौ पङ्कजादि। किञ्चिद्यौगिकमेव, यथा पाककर्नादौ पाचकादिः ।

रूढयौगिकमप्यधिकं नाम यथा मण्डपमहारजतादि तद्धि कदाचिदवयववृत्त्या योगार्थमेव, कदाचिच्च समुदायशक्त्या रूढ्यर्थमेव अभिधत्ते इत्यपरेषां मतम्। गौर्वाहिक इत्यादौ तु शक्यार्थसदृशत्वावच्छिन्नबोधकतया गौणं गवादिपदं गोसदृशादौ लक्षकमेव न तु ततो भिद्यते ।

संज्ञापरपर्यायरूढं हि नैमित्तिकी पारिभाषिकी औपाधिकीति संज्ञा त्रिविधा। तदुक्तं जगदीशतर्कालङ्कारेण -

रूढं सङ्केतवन्नाम, सैव संज्ञेति कीर्त्यते।

नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तदिभदा॥[12] इति।

यन्नाम यादृशार्थे सङ्केतितमेव न तु यौगिकमपितद्रूढम् योगरूढन्तु पङ्कजादिकं न तथा। रूढानामेव च संज्ञापदेनाभिलप्यते, न तु रूढादिवत् संज्ञापि नाम्नोऽवान्तरभेदः येन विभागव्याघातः स्यात्। सञ्ज्ञायाश्च त्रयो भेदाः नैमित्तिकी परिभाषिकी औपाधिकी चेति।

इत्थं पाचक पाठकादयस्तु च संज्ञा सङ्केतशून्यत्वात् केचिद्रूढस्य चतुर्विधत्वमाहुस्तन्मतमुपन्यस्यति -

जातिद्रव्यगुणस्पन्दैर्धः सङ्केतवत्तया ।

जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः॥[13] इति।

जाति-व्यक्ति-गुणक्रियारूपोपाधिषुगृहीतसङ्केतितत्तया जातिशब्द-व्यक्तिशब्द क्रियाशब्देतिभेदान्नाम्नश्चतुर्विध्यमिति वैयाकरणाः प्राहुरिति कारिकार्थः ।

गोगवयादीनां गोत्वादिजात्या पश्वाढ्यादीनां लाङ्लघनादिद्रव्येण धन्यपिशुनादीनां पुण्यद्वेषादिगुणेन चलचपलादीनाञ्च शब्दानां कर्मणावच्छिन्नशक्ति मत्वाच्चातुर्विध्यमेव रूढानामिति । यदुक्तं दण्ड्याचार्यैः -

शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रिया।

चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विधः॥ इति ।

तदेतज्जडमूकमूर्खादीनामन्यशून्यादीनाञ्च शब्दानामपरिग्रहापत्त्या परित्य क्तमस्माभिः।

नैमित्तिकसंज्ञां लक्षयति -

जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता।

जातिमात्रे हि सङ्केतेतद्व्यक्तेर्भानं सुदुष्करम्॥[14] इति।

स्वमतेनोक्ता नैमित्तिकी संज्ञां लक्षयति। जातिविशिष्टव्यक्तौ गृहीतसङ्केता संज्ञा नैमितिकीयर्थः । मीमांसकमतानुसारेण जातिमात्रे यदि सज्ञायाः सङ्केतो गृह्यते तदा व्यक्तिभावसंज्ञया न स्यादिति परार्धार्थः। यन्नाम जात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा, यथा गौचैत्रादिः। सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादि जातिमात्रम् गोपदं गोत्वे सङ्केतितमित्याकारकग्रहाद्गामानेत्यादौ गोत्वादिना गवादेरन्वयानुभवानु पपत्तेः, एकशक्तत्वग्रहस्यान्या नु भावकत्वेऽतिप्रसङ्गात् ।

जातिमात्रे पदस्य शक्तिरिति वादिनां तौतातितानां भाट्टानां मतं दूषयितुं तन्मतमुपन्यस्यति। ननु 'गामानये' त्यादौ गोत्वादिकर्मताकत्वेनैवानयनादेरन्वयर्धा गोर्त्वादिशक्तत्वेन पदज्ञानस्य गोत्वाद्यन्वयबुद्धिं प्रत्येव हेतुत्वात्।

शक्तितात्पर्य निर्यायक चित्रनम् - सा च शक्तिः संयोगादिर्भिनानार्थशब्देषु नियम्यते। तदुक्तं हरिणा -

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।

अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥[15]

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।

शब्दस्यार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥[16] इति ।

संयोगादयः शब्दार्थस्यानवच्छेदः संदेहे तदपाकारणद्वारेण विशेषस्मृति हेतवः निर्णयहेतव इत्यर्थः। उपस्थितानामनेकेषामेकतरमात्रार्थतात्पर्यनिर्णयद्वारा तन्मात्रार्थविषयकान्वयबोधजनका इति तदाशयः। संज्ञासूत्रभाष्येऽपि स्फुटमेतत् । अत्र सामर्थ्यमेवैकं मुख्यं निर्णायकं योगादयस्तदव्यञ्जकप्रपञ्चास्तैः सामर्थ्यस्यैवाभिव्यक्तेरिति परे।

"सवत्सा धेनुः" "अवत्सा धेनुः इति संसर्गविप्रयोगयोरुदाहरणे। धेनुशब्दस्य नवप्रसूतामात्रवाचकत्वमेतेनेदमुक्तम्। नवप्रसूतगवीमात्रवाचित्वे तु सशङ्खचक्रो हरिः इत्युदाहर्त्तव्यम्। निषेधस्य प्राप्तिपूर्वकत्वात्प्राप्तेश्च तत्रैव सम्भवाद् "अवत्सा" शब्देन गौः एवोच्यते। सदृशयोरेव सहचरणस्य दृष्टतया लक्षणया सहचरणशब्दस्य सदृशार्थबोधकत्वेन साहचर्यं सादृश्यमुच्यते। न च सहचरणरूपसादृश्यग्रहणे दशरथापत्ययोरेव सहचरणात्तयोरेव "समलक्ष्मणौ" इत्यत्र ग्रहणं सिध्यति सादृश्यग्रहणे त्वेकस्य

नियतत्वे हि तत्सादृश्यमन्यस्मिन् वाच्यमिति "रामलक्ष्मणौ" इत्यत्र द्वयोरपि नानार्थकतया परस्परसादृश्यग्रहणेऽन्योन्याश्रय इति वाच्यम् "अपपरिबहिरञ्चवः पञ्चम्या" इति सूत्रस्थभाष्यप्रामाण्यात् सदृशयोरेव सहप्रयोगनियमेन युगपदेवोभयोः सादृश्यनियमात् तदाह-नान्योऽन्याश्रयः। साहचर्य सादृश्यम् सदृशयोरेव सहप्रयोगनियमात्। 'रामार्जुनगतिस्तयोः' इत्यत्र जुहोत्यादिपदार्थवशात् अञ्जलिपदस्य तत्तदाकाराञ्जलिपरत्वम्। "सैन्धवमानय" इत्यादौ प्रकरणेन तत्। "अक्ता शर्करा उपदधाति" इत्यादौ 'तेजो वै धृतम्' इति घृतस्तुतिरूपात् लिङ्गात् "अक्तः इत्यस्य घृतसाधनाञ्जनपरत्वम्। "रामो जामदग्न्यः इत्यादौ जामदगन्यः" पदसन्निधानेन रामः परशुरामः । "अभिरूपाय कन्या देया' इत्यादावभिरूपतराय" इतिसामर्थ्यात् प्रतीयते।

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा।

यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः॥[17]

इत्यादावौचित्यात् "परशुना" इत्यस्य छेदनार्थत्वम्। "भात्यत्र परमेश्वरः" इत्यत्र राजधानीरूपाद् देशात् "परमेश्वरपदं राजबोधकम् । "चित्रभानु ति" इत्यादौ रात्रौ वह्नौ दिवा सूर्ये बोधः। व्यक्तः लिङ्गम् "मित्रो भाति" "मित्रं भाति अत्राद्ये सूर्यः अन्त्ये सुहृद् । "स्थूलपृषतीम्" इत्यादौ स्वरात्तत्पुरुषबहुव्रीह्यर्थनिर्णयः।

आदिना षत्वसत्वणत्वनत्वादि। "सुषिक्तम्" इत्यत्रोपसर्गोऽन्यार्थः । "सुसिक्तम्" इत्यत्र पूजार्थः सु प्रवचनीयः। प्रणायके प्रणयनक्रियाकर्ता णत्वात्। प्रनायके प्रगतनायकदेशबोधः इति पुञ्जराजः।

क्वचित्प्राकरणिकार्थबोधोत्तरं वक्तृबोद्धव्यवैशिष्ट्यप्रतिभादिसहकारेण द्विती यार्थबोधोऽपि यथा "गतोऽस्तमर्कः इत्यादौ वक्ता धार्मिकश्चेत्तदा तेन सन्ध्यावन्दनसमयो गम्यते यदा च बोद्धव्यस्तादृशस्तदापि स एवार्थो गम्यते। एवं वक्तृबोद्धव्ययोर्दुष्टत्वे स्तेयाद्यवसरावगमः। एवमेव "सुरभिमांसम्" अत्र मांसलाभोन्मुखं प्रति सुरभिमांसमपेक्षते इति श्यालकवचने अण्डकोशादि प्रतीयते।

॥इति शक्तिस्वरूपविचारः॥

शक्तिरूप विचारसारः - भूषणसारग्रन्थानुसारं पदे पदार्थबोधिकया काचिद् योग्यता अनादिकालस्तिष्ठति सैव शक्तिरिति। यथा-चक्षुरादीन्द्रियेषु घटादिपदार्थस्य रूपादिग्रहणस्य नैसिर्गिकी योग्यता भवति तथैव शब्दादीनामपि अर्थैः सह तद्बोधकारणतारूपा या काचिद् योग्यता भवति सैव शक्तिरित्युच्यते। तदुक्तं वैयाकरणभूषणसारे -

"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।

अनादिरथैः शब्दानां सम्बन्धो योग्यता तथा"||[18] इति॥

शाब्दबोधाय बोद्धरि वृत्तिविशिष्टज्ञानमपेक्ष्यते तदुक्तं वैयाकरणसिद्धान्तलघुमञ्जूषायाम्- "तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः"[19] इति। अर्थाद् यस्य जनस्य घटत्वावच्छिन्नघटविषयकवृत्तिविशिष्टं ज्ञानं न भवति तस्य कृते अयं घटपदार्थ इति शाब्दबोधो न जायते। नैयायिकास्तु "अस्माच्छब्दादयमर्थो बोद्धव्यः इदं पदमिमर्थं बोधयतु" इत्याकारिकामिच्छामीश्वरेच्छां वा शक्तित्वेन स्वीकुर्वन्ति। प्रथमे लक्षणे अर्थप्रकारक: पदविशेष्यको बोधः द्वितीये च लक्षणे पदप्रकारकोऽर्थविशेष्यको बोधः । नागेशभट्टस्तु नैयायिकोक्तमेतन्मतं निराकृत्य उक्तवान्-इच्छायाः सम्बन्धिनोराशयतानियामकत्वाभावात् शक्तित्वं न युक्तम् । न हि कश्चित् घटशब्दः इच्छावान् तदर्थो वा। इत्थं सम्बन्ध एव शक्तिः। स च द्विष्ठः तदुक्तं मजूषायां - सम्बन्धो हि सम्बन्धिभ्यां भिन्नः उभयाश्रितः विशिष्टबुद्धिः नियमाकश्च[20] । इत्थं वाच्यवाचकभावपरपर्याय एव शक्तिः ।[21] इतिशक्तिस्वरूपविचारः

लक्षणास्वरूपविमर्शः - अत्र तार्किकाः स्वशक्यसम्बन्धो लक्षणा। शक्यसम्बन्धत्वं लक्षणाया लक्षणम्। शक्यस्य शक्त्योपस्थापितस्यार्थस्य, सम्बन्धः यः कश्चित् सामीप्यसादृश्यादिर्यथायोग्यं सम्बन्धः स एव लक्षणा इति तदर्थः। स्वपदेन शक्तं पदं ग्राह्यम् । यादृशानुपूर्व्यवच्छिन्नं नाम, यद्धर्मविशिष्टयन्निरूपितशक्तिशून्यत्वे सति

यद्धर्मविशिष्टनिरूपितसम्बन्धवन्निरूपितशक्तिनिरूपकं तद्धर्मप्रकारक तद्विशेष्यबोधे तादृशानुपूर्व्यवच्छिन्नं नाम लक्षकमिति लक्षणार्थः। शक्यसम्बन्धो लक्षणेति संक्षि प्तार्थः । प्राञ्च अन्वयानुपपत्तिः तात्पर्यानुपपत्तिश्च लक्षणाबीजे। नव्यास्तु तात्पर्यानु पपत्तिमेव सर्वत्रानुगतलक्षणाया बीजं वदन्ति। अत आहुः मुक्तावल्याम् लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तिः ।।इति।

लक्षणाविषये नैयायिकास्तु तत्र लक्ष्योपस्थितिनियामकः सादृश्यात्मकः सम्बन्धो गौणी, तदरिक्तस्तु शुद्धलक्षणेति व्यवह्ियते। शुद्धाप्युपादानलक्षणभेदेन द्विविधा। तत्र मुख्यसंसृष्टान्यार्थोपस्थापकत्वमुपादानत्वम्। शक्याविषयकलक्ष्यार्थोप स्थितिजनकत्वं लक्षणत्वम्। 'यष्टीः प्रवेशय' गङ्गायां घोषः" इत्यादिके यथायथमुदाहरणे। तत्राप्याद्याऽजहत्स्वार्था, अन्त्या च जहत्स्वार्थत्युच्यते। तभेदान्तराणि त्वन्यतोऽवधार्याणीति नैयायिका आहुः ।

मीमांसकास्तु-उक्तयुक्त्या लाक्षणिकपदस्य वाचकत्वपरिहारेऽपि नेश्वरे च्छायाः शक्तितत्वम्, ईश्वरस्यैवानभ्युपगमात्। नन्विच्छाया ईश्वरीयत्वमनुपादेयमेवञ्चाऽऽधुनिकसङ्केतज्ञानादपि शाब्दबोधोदयेन तादृशसङ्केतस्य वृत्तितानिर्वाहः। आधुनिकसङ्केतत्वेन तात्पर्यस्याऽपि वृत्तित्वप्रसङ्गस्तु न पदार्थोपस्थितिनियामकसङ्केतस्यैव वृत्तित्वेन तस्याऽतत्त्वात्। तज्ज्ञानस्य साक्षादेव शाब्दधीजनकतया पदार्थोपस्थित्यात्मकव्यापारानपेक्षणाद् वृत्त्युपस्थापितार्थ एव प्रकरणादिना तदवधारणात्।

आधुनिकसङ्केतितडित्थादिपदेषु त्वाधुनिसङ्केतस्य प्रागवधारितस्य डित्था दिव्यक्तिशाब्दधीजनकपदार्थोपस्थितौ नियामकत्वेन तवृत्तित्वस्य सौलभ्यादिति चेदेवमपि सङ्केतस्य निष्प्रतियोगिकतया तदीयोक्तविषयत्वस्याप्यापातरमणीयतया

सम्बन्धित्वासम्भवेन पदार्थानुपस्थापकत्वाद् वृत्तित्वानिर्वाहात् । तस्मात् पदपदार्थ योर्वाच्यवाचकभावनियामकः सम्बन्धः पदार्थान्तरमेव। नाप्यसौ समवेतः अभावादावपि सत्त्वात्। किन्तु वैशिष्ट्याख्येन सम्बन्धान्तरेण वर्तते इत्याहुः।

जगदीशतर्कालङ्कारः शब्दशक्तिप्रकाशिकायां लक्षणाया लक्षणं प्रतिपादयन्नाह -

यादृशार्थस्य सम्बन्धवति शक्तन्तु यद्भवेत्।

तत्र तल्लक्षकं नाम तच्छक्तिविधुरं यदि॥[22] इति।

यादृशानामार्थसम्बन्धवति यन्नाम सङ्केतितं तदेव तादृशार्थे लक्षकं यदि तादृशार्थे शक्तिशून्यं भवेदिति कारिकार्थः। तस्य मतेन मुख्यार्थशक्तिशून्यत्वे मुख्यार्थसम्बन्धार्थशक्तं नाम लक्षकम्। सैन्धवादयस्तु शब्दास्तुरगादिसम्बन्धिनि लवणादाविव तुरगादावपि शक्ता एव। गङ्गादयस्तु तीरादावसङ्गतास्तत्सम्बन्धिनी तीरादिशक्तत्वेन गृहीता एव तीराद्यन्वयं बोधयन्तीति तत्र ते लक्षका एव। ननु गङ्गापदं तीरे शक्तं तीरार्थकत्वेन प्रयुक्तत्वादित्यनुमानादिना गङ्गापदस्य तीरादौ शक्तितरनुमेयेति लक्षणमिदमसम्भवतीत्यत उच्यते। तीरादिशक्तत्वे पूर्वपूर्वप्रयुक्तस्वापत्तेः शक्तत्वस्य तद्व्याप्यत्वात् तथा चोक्तानुमानं स्वरूपासिद्धमिति तीरादौ गङ्गादिपदस्य न शक्तिसाधकमिति भावः। यद्यपि गङ्गातीरत्वाविशिष्टे गङ्गापदस्य पूर्वपूर्वप्रयुक्तत्वमस्त्येव, तथापि गङ्गात्वविशिष्टापेक्षया गङ्गातीरत्वाविशिष्टे लक्षणैव लघुनो गङ्गात्वस्य शक्त्यतावच्छेदकत्वादिति ध्येयम्। कथञ्चित्तीरादिसम्बन्धित्वेन गृहीतादपि गङ्गादिपदात्तीरादेरन्वयाबोधेन तीराद्यशक्तत्वे सति तत्सम्बन्धितामात्रन्तु न लक्षणा, गङ्गागङ्गायां घोष इत्यादावपि गङ्गागङ्गेतिभागस्य निरूक्तलक्षणायाः सत्त्वेन वैयर्थ्याभावप्रसङ्गाच्च। एतेन 'तीराद्यशक्तत्वे सति तीरादिपरत्वे तीरादिपरत्वं तीरादिसम्बन्ध्यनुभावकत्वं वा तल्लक्षकत्वमित्यपि प्रत्युक्तम् अपभ्रंशस्यापि लक्षकत्वापातात्। न चेष्टापत्तिः शक्ति लक्षणान्यतरवृत्तिमत्वे तस्य साधुत्वापत्तेः पदसाधुतायां वृत्तिमत्त्वस्यैव तन्त्रत्वात् । केचित्तु शक्यत्वमेव पदसाधुताप्रयोजकं वाच्यं तथा वापभ्रंशादिशब्दस्य न साधुत्वप्रसङ्ग अत्रोच्यते किञ्चानुभावकत्वं यद्यनुभवस्योपाधायकत्वं तदा घोषादिपदसाकाङ्क्षस्य गङ्गादिपदस्य तीरलक्षकता न स्यात् तेन तीरसम्बन्धिनो नीरस्यानुभवानर्जनात्, स्वरूपयोग्यत्वन्तु गङ्गायामिति वाक्यस्य दुर्वारं तस्या प्याधेयताधर्मिकनीरानुभवं प्रति नीरार्थकनामोत्तरसप्तमीत्वेन तथात्वात् नीराधेयत्वस्य च तीरसम्बन्धित्वानपायात्।

लक्षणाया भेदविषये जगदीशतर्कालङ्कारस्तु शब्दशक्तिप्रकाशिकायां लक्षणाया भेदं प्रतिपादयन्नाह -

जहत्स्वार्थाजहत्स्वार्थनिरूढाधुनिकादिकाः

लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा॥[23] इति।

तासां निरुक्तानां लक्षणानां प्रत्येकलक्षणं निरूपयन्नुच्यते काचिल्लक्षणा शक्यावृत्तिरूपेण बोधकतया जहत्स्वार्थेत्युच्यते, यथा तीरत्वादिना गङ्गादिपदस्य। काचिच्छक्यलक्ष्योभयवृत्तिना शक्यवृत्तिनैव वा रूपेणानुभावकत्वाद् जहत्स्वार्था, यथा द्रव्यत्वादिना नीलघटत्वादिना च घटपदस्य। काचिल्लक्ष्यतावच्छेदकीभू ततत्तद्रूपेण पूर्वं पूर्वं प्रत्यायकत्वान्निरूढा, यथा आरुण्यादिप्रकारेण तदाश्रयद्र व्यानुभावकत्वादरुणादिपदस्य। काचिच्च पूर्वं पूर्व ताद्प्ये णाप्रत्यायकत्वादाधुनिकी, यथा घटत्वादिना पटादिपदस्य। आदिना शक्यसदृशत्वप्रकारेण बोधकतया गौण्युपगृह्यते, यथा अग्निर्माणवक इत्यादावग्निसदृशत्वादिना अग्न्यादिपदस्य। तदेवं विविधलक्षणावत्त्वाल्लक्षकं नामापि जहत्स्वार्थाऽजहत्स्वार्थादिभेदादनेकवि धमित्यर्थः।

ननु गङ्गादिपदात्तीराद्यन्वयबोधानुरोधात्तत्र तस्य लक्षणा स्वीक्रियते, अन्यथा गङ्गादिपदस्य तीरादावसङ्केतितत्वेन तीराद्यन्वयबोधानर्जकत्वप्रसङ्गात्, तथा च गङ्गापदं तीरान्वयबोधानुकूलवृत्तिमत् तीरान्वयबोधजनकयथार्थज्ञानविषयशब्दत्वात् तदन्वयबोधजनकशब्दत्वस्य तवृत्तिमत्वे नियतत्वात् इत्यनुमानादितरबाधसहकारेण तत्र तस्य लक्षणा सेत्स्यति, तदेव न, तादृशानुमानस्य स्वरूपासिद्धत्वादिति मीमांसकमतमुत्थाप्य निषेधयति। यदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीराद्यनुभवे भवेद्धेतुर्भवेदप्युक्तक्रमेण लक्षणानां विभागः न त्वेतदस्ति, तीराद्यन्वयबोधं प्रति तीरादिशक्तत्वे नैव पदज्ञानस्य लाघवेन हेतुतया लक्षकाणामननुभावकत्वात् गुरुणा ‘‘मग्नौ शैत्यं स्पृशे" दित्यादौ शक्येन दहनादिनेव 'गङ्गायां घोष' इत्यादौ लक्षितेन तीरादिना सार्द्धमगृहीतासंसर्गकस्यैवसप्तम्यर्थावियत्वादेरन्वय बोधप्रविष्ट तवादिति चेन्न।

प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य धर्म्यन्तरेऽन्वयबुद्धेर्युत्पन्नतयाती राद्यविशेषितस्य सुबर्थाधेयत्वादे?षादावन्वयबोधायोगात्। ननु लक्षकपदज्ञान स्याहेतुत्वेऽपि लक्षितार्थस्य विशिष्टबोध उत्पत्तुमर्हतीति नोक्तदोष इत्यत्र कथ्यते । न च शक्तपदस्यैव स्वसाकाङ्कापदान्तरोपस्थाप्यान्वितस्वार्थधर्मिकान्वयबोधं प्रति हेतुत्वादन्वयबुद्धौ लक्ष्यार्थस्याप्रवेशः, 'कुन्ताः प्रविशन्ती' त्यादौ लक्ष्यस्य कुन्तधरादेरन्वयविशेष्यत्वानुपपत्तेः कुमतिः पशुरित्यादौ लक्ष्यार्थयोमिथोऽन्वयबोध स्याप्यानुभविकत्वाच्च। तस्माच्छक्तेरिव भक्तेरपि ज्ञानमनुभावकं भवत्येव, कार्यतावच्छेदकस्य सङ्कोचाच्च न व्यभिचारः।

परमलघुमञ्जूषायान्तु लक्षणाया स्वरूपं निरूपयन् नागेशभट्टेनोच्यते ननु लक्षणा कः पदार्थ? इति चेत् अत्र तार्किकाः प्राहुः- स्वशक्यसम्बन्धो लक्षणा। सा च द्विविधा-गौणी शुद्धा च।।

गौणी तत्र स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपा दिका। गुणसादृश्यसम्बन्धेन यः शक्यार्थसम्बन्धस्तस्य प्रतिपादिका गौणीत्याशयः। यथा 'सिंहो माणवकः'। अत्र हि सिंहपदस्य शक्यार्थो मृगेन्द्रः। अत्र स्वपेदन सिंहपदमेवाभिप्रेतम। सिंहे ये हि शौर्यादयो गुणा विद्यन्ते तत्सदृशा एव शौर्यादयो गुणा माणवकेऽपि सन्ति। अतोऽत्र माणवके सिंहनिरूपितसादृश्यमस्ति।

तत्सादृश्यस्याधिकरणं माणवकः। अत एतादृशसादृश्याधिकरणत्वरूपसम्बन्धेन माणवकस्यार्थबोधो लक्षणयैव भवति। सैषा गुणसादृश्याश्रितत्वेन गौणीत्युच्यते।

शुद्धा- तदतिरिक्तसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका शुद्धा। शुद्धायां कार्यकारणभावादिसम्बन्धोऽपेक्षितो भवति। उपचारामिश्रणादेषा शुद्धेति। यथा 'आयुर्घतम्' इत्यत्र घृतस्यायुर्वृद्धिकारणत्वेन कार्यकारणभावसम्बन्धमाश्रित्य घृतशब्दस्तत्सम्बद्धायुषं लक्षणया बोधयति।।

प्रकारान्तरेणापि सा द्विविधा-अजहत्स्वार्था जहत्स्वार्था च। "स्वार्थसंवलितपरार्थाभिधायिका अजहत्स्वार्था"। स्वार्थः-शक्यार्थः। यत्र शक्यार्थलक्ष्यार्थयोरुभयोः क्रियायामन्वयो भवति सा अजहल्लक्षणा। तेन 'छत्रिणो यान्ति' 'कुन्तान् प्रवेशय' 'यष्टीः प्रवेशय' 'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ छत्रिसहितसेना कुन्तास्त्रसहितपुरुष-यष्टिसहितपुरुषकाकसहितसर्वदध्युपघातक बोधः इति छत्र्यच्छत्रिषु गच्छत्सु छत्रिणां बाहुल्येन छत्रिणो यान्तीत्यच्छत्रिषु यानकर्तृत्वानुपपत्त्या "छत्रिपदस्य छत्र्यच्छत्र्युभयसाधारणे एकसार्थवाहित्वविशि ष्टेऽजत्स्वार्थलक्षणा। "यानानुकूलकृतिमन्त एकसार्थवाह" इत्यन्वयबोधः । अत्रैकसार्थवाहित्वेन रूपेणाच्छत्रिणामिव छत्रिणामपि गमनेऽन्वयः। यत्र शक्यार्थस्य विशेष्यतया क्रियाद्यन्वयस्तत्राजहत्स्वार्था यथा छत्रिणो यान्ति" इत्यादौ, अत्र हि न शक्यार्थो लक्ष्यार्थे विशेषणीभूयान्वेति। "यष्टीः प्रवेशय" इत्यादौ तु जहत्स्वार्थव यष्टेः पुरुषविशेषणतयाऽन्वयादिति तार्किकोक्त खण्डयति-कुन्तास्त्रसहितपुरुषबोधः । कुन्तिनि पुरुष संयोगेन कुन्तो विशेषणम्, तथा च कुन्तिनामिव कुन्तानामपि प्रवेशक्रियायामन्वयः इति तत्राप्यजहत्स्वाथैव। जहत्स्वार्थाया लक्षणन्तु मञ्जूषायाम् स्वार्थपरित्यागेनेतरार्थाभिधायिकाऽन्त्या। तत्परित्यागश्च शक्यार्थस्य लक्ष्यार्थन्वयि नाऽनन्वयित्वम। तेन 'गां वाहीकं पाठय' इत्यादौ गोसदृशलक्षणायामपि न गोस्तदन्वयिपाठनक्रियान्वयित्वम् ।

"काकेभ्यो दधि रक्ष्यताम्" इति वाक्यघटककाकपदस्य दधिनाश कत्वावच्छिन्ने जहत्स्वार्थलक्षणा काकवदनिष्ठकारकत्वसम्बन्धात्मिका भवति। तत्र दध्युपघातकेभ्यः सर्वेभ्यः दधिनिष्ठाया नाशप्रतियोगिताया अभावस्य वक्तुरिच्छाविषयत्वात् तादृशतात्पर्यस्य काकपदशक्यार्थे काकेऽनुपपत्त्यात्मकबीजा लक्षणा उद्भाव्यते।

"काकेभ्य इत्यत्र पञ्चम्या जन्यत्वमर्थः, व्यापारो नाशानुत्पत्तिश्च धात्वर्थः एकपदार्थयोरपि व्युत्पत्तिवैचित्र्येण विशेष्यविशेषणभावेनान्वयः, तथा च "दध्युपघा तकजन्यनाशोत्पत्तिप्रतियोगिकत्ववत्कर्तृव्यापारप्रयोज्याभावाधिकरणं दधीति शाब्द बोधः। अत्र काकपदस्य दध्युपघातके लक्षणया लक्ष्यतावच्छेदकदध्यपुघातकत्वेन रूपेण काकस्यापि क्रियायामन्वयादजहत्स्वाथैव भावः । इयञ्च गौणी लक्ष्यार्थस्य विडालादेः सादृश्यसम्बन्धेन शक्यार्थसम्बद्धत्वात्।

सा च लक्षणा तात्स्थ्यादिनिमित्तिका। तदाह -

तात्स्थ्यात् तथैव ताद्धात् तत्सामीप्यात् तथैव च।

तात्साहचर्यात् तादाज्ज्ञेया वै लक्षणा बुधैः ॥ इति।

तात्स्थ्यात् 'मञ्चा हसन्ति' 'ग्रामः पलायितः' । ताद्धात् 'सिंहो माणवकः' 'गौर्वाहीकः । तत्सामीप्याद् 'गङ्गायां घोषः' तत्साहचर्याद् 'यष्टीः प्रवेशय'। तादाद 'इन्द्रार्था स्थूणा इन्द्रः' ॥इति॥

जगदीशतर्कालङ्कारस्तु - तत्र अन्वयानुपपत्तिज्ञानस्य लक्षणाबीजत्वं हि न तज्जकत्वं शक्य सम्बन्धात्मिकाया लक्षणायास्तदजन्यत्वात् नापि तज्ज्ञापकत्वं मुख्यार्थान्वयानुपप त्तिज्ञानमन्तरेणापि प्रमाणान्तरेण तद्ग्रहसम्भवात् अत एव न लक्ष्यार्थता त्पर्यग्राहकत्वमपि प्रकरणादितोऽपि लक्ष्यार्थपरत्वग्रहात्। न च लक्षणाजन्यान्वयबोधं प्रति तस्याः कारणत्वमेव लक्षणाबीजत्वमिति साम्प्रतम् "यष्टीः प्रवेशये" त्यादौ व्यभिचारात् तादृशहेतुतायां प्रमाणाभावाच्च इति बोधकशब्दस्य पदार्थेकेदेशे लक्षणायां जहदजहल्लक्षणेति व्यवहर्तृणां केषाञ्चन नैयायिकानां वेदान्तिनां च मतमुपस्थापयति नागेशः। तेषां मतेन वाक्यार्थे किञ्चिदंशत्यागः किञ्चिदंशपरिग्रहश्च । अत्र ग्रामैकदेशे च दग्धे ग्रामो दग्धः पटैकदेशे च दग्धे पटोदग्धः इति व्यवहारः "तत्त्वमसि' इत्यत्र सर्वज्ञत्वाल्पज्ञत्वयोस्त्यागः शुद्धचैतन्ययोरभेदान्वयः। परम् "आढ्यमिदं नगरम्" इति भाष्योक्तरीत्या "ग्रामो दग्ध' इत्यादौ लक्षणाया अभाव एव। किञ्च "तत्त्वमसि" इत्यादौ जहदजहल्लक्षणायाः सत्वेऽपि जहल्लक्षणयैव निर्वाहः नञः प्रतियोगितावच्छेदकावच्छिन्नाभावबोधकत्वात् इति। ननु शक्यसम्बन्धो लक्षणा स्वीक्रियते तर्हि नैयायिकमते वाक्ये शक्तेरभावात् शक्यसम्बन्धरूपा लक्षणापि नैव स्यात्। मीमांसकास्तु स्वबोध्यसम्बन्धो लक्षणेति ब्रुवते गभीरायां नद्यां घोष इत्याद्यनुरोधात्। तथाहि न तावत् गभीरपदं तीरं तीरलक्षकं नद्यामित्यन्वयापत्तेः । तस्मात् समुदायबोध्यगभीरत्वविशिष्टनदीपदार्थः तत्सम्बन्धो लक्षणा। द्विरेफपदस्य स्वलक्ष्यभ्रमरशब्दवाच्यार्थे लक्षणायां लक्षितलक्षणेति व्यवहारः ।

लक्षणा स्वरूपविचार चित्रनम् - वैयाकरणास्तु वृत्तेः द्वैविध्यमेव अङ्गीकुर्वन्ति शक्तिर्व्यञ्जना चेति। तथा च वैयाकरणमते वृत्तिर्नाम शक्तिव्यञ्जनान्यतररूपा। नैयायिकाः शक्तिः लक्षणा चेति। अन्येषां मते वृत्तिस्त्रिधा शक्तिलक्षणा व्यञ्जना च। तेषां मते तु वृत्तिर्नाम नाम शक्तिलक्षणाव्यजनान्यतमरूपा। तथाहि वैयाकरणमते गङ्गादिपदे प्रवाहतीरायुभयविषयनिरूपिता शक्तिः वर्तते। "गङ्गायां धार्मिकः स्नाति' इत्यादिस्थले "गङ्गादिपदस्य" जले शक्तिः। एषा च प्रसिद्धा। परं "गङ्गायां घोषः' इत्यादिस्थले गङ्गापदे तीरादिपदार्थः बोधिका शक्तिः सा च अप्रसिद्धारूपा। तथा हि आमन्दबुद्धिवेद्यत्वं प्रसिद्धात्वं तभिन्नत्वम् अप्रसिद्धात्वं च। नैयायिकोक्तलक्षणादिरूपा या वृत्तिः वैयाकरणमते सैव अप्रसिद्धा शक्तिः । "इको यणचि' इति सूत्रे भट्टोजिदीक्षितेनोक्तम्- प्रत्याहारजन्यबोधे तद्वाच्यवाच्ये निरुढालक्षणा इति। सा तु शक्तिरेव। नागेशस्तु नैयायिकोक्तं मतं प्रकारान्तरेण उपस्थाप्य अन्ते च प्रसिद्धा- प्रसिद्धति शक्तेर्भेदद्वयं स्वीकृत्य लक्षणा निराकृता। शक्यताऽवच्छेदकारोपारूपालक्षणेति नागेशोक्तं वाक्यं न लक्षणायाः

स्वीकरणम् अपितु नैयायिकोक्तमतस्य शब्दान्तररूपम्। नैयायिकास्तु स्वशक्यसम्बन्धो लक्षणाः । तथा च "गङ्गायां घोषः" इत्यादौ स्वपदेन गङ्गापदं ग्राह्यं तच्छक्यः प्रवाहः तस्य सामीप्यसम्बन्धेन तीरस्य बोधः । अतः घोषस्य आधारता तत्र सम्भवति। नो चेत् आभीरपल्या घोषस्य प्रवाहादौ आधारता न सम्भवति ।

अन्वयानुपपत्तिः तात्पर्यानुपपत्तिः वा लक्षणाया बीजम्। "गङ्गायां घोषः" इत्यादौ गङ्गादिपदे घोषादेराधारतायाः अन्वयस्य अनुपपत्तेः गङ्गादिपदेन संकेतितार्थस्य परित्यागो भवति, एवं तस्य सम्बन्धिनः पदार्थानन्तरस्य बोधो भवति। येन अन्वयस्य उपपत्तिर्जायते। न च घोषादिपदस्य एव मीनादौ लक्षणया अन्वयानुपपत्तिरूपो दोषः अपाकर्तुं शक्यते। तथापि वक्तुः तथा तात्पर्याभावाद् गङ्गापदस्य एव तीरादौ लक्षणा क्रियते। इत्थं तात्पर्यानुपपत्तिरेव लक्षणायाः बीजं स्वीकर्तव्यम्। उभयविध बीजस्वकारे तु गौरवम्।

नैयायिकोक्तम् एतन्मतं "गभीरायां नद्यां घोषः" इत्यादौ न सङ्गच्छते। यतो हि यदि नदीपदस्य तीरे लक्षणा क्रियते, तदा शुष्कप्रदेशस्य तीरस्य गभीरपदार्थेन सह अन्वयो भवितुं नार्हति। न हि तीरं गभीरमिति। न हि गभीरपदस्य तीरे लक्षणा कर्तुं शक्यते। अतः स्वबोध्यसम्बन्धो लक्षणा इति मीमांसाकैरङ्गीक्रियते। तेन गभीराभिन्ना या नदी तस्याः तटे लक्षणा क्रियते तस्य घोषाधारं सङ्गच्छते।

लक्षणायाः भेदविषयेऽपि विद्वत्सु मतैक्यं नास्ति। केचित् शुद्धा, गौणी इति भेदेन लक्षणायाः भेदद्वयं स्वीकुर्वन्ति। तथा हि- सादृश्यसम्बन्ध्यर्थबोधिका गौणी यथा- "गां पाठय" इत्यादौ पठन् क्रियायाः सास्नादिमति गोपदार्थेऽन्वयाभावात् गोस्थितमान्द्यादि सादृश्यत्वाद् गोपदार्थस्य तत्सादृश्यबालके बोधः । सादृश्यान्यसम्बन्ध्यर्थनिरूपिता शुद्धा यथा- "गङ्गायां घोषः" इत्यादौ सामीप्यादिसम्बन्धबोधः। एतदेव प्रकारान्तरेण जहत्स्वार्थाजहत्स्वार्थेति उच्यते। जहति स्वार्थ पदानि यत्र सा जहत्स्वार्था यथा- "गङ्गायां घोषः" इत्यादौ गङ्गापदं स्वीयं जलादिरूपमर्थं परित्यज्य तीरादिरूपार्थं बोधयति "कुन्ताः प्रविशन्ति" "छत्रिणो यान्ति" इत्यादौ कुन्तादिपदार्थबोधराहित्यं विनापि तत्सहितपुरुषादिपदार्थस्य बोधः । एवं छत्रिणो यान्ति इत्यत्र छत्रिसहित अच्छत्रिधारिणोऽपि बोधो जायते। नैयायिकाः साहित्यिकाश्च जहदजहद् लक्षणेति भेदान्यमपि स्वीकुर्वन्ति यथा- "तत्त्वमसि' इति वाक्यादौ तत्पदेन सर्वज्ञत्वविशिष्ट चेतनः, 'त्वत्' पदेन च अल्पज्ञत्व विशिष्ट चेतनः, असि क्रियापदेन च तयोरैक्यम् इति कथमभेदानन्वय उपपद्येत तदा उच्चते-तत्पदार्थस्य सर्वज्ञात्वांशस्य परित्यागेन चेतनत्वांशस्य परिग्रहेण, एवं त्वत् पदार्थे अल्पज्ञात्वांशस्य परित्यागेन चेतनात्वांशस्य परिग्रहेण च उभयोरेक्ये न काचित् अनुपपत्तिः। वस्तुतस्तु 'तत्त्वमसि' इत्यादौ जहद्जहल्लक्षणायाः सत्त्वेऽपि जहल्लक्षणयैव निर्वाह: नञः प्रतियोगितावच्छेदकावच्छिन्नाभावबोधकत्वात्। इयमेव भागलक्षणा इत्युच्यते। द्विरेफादिपदस्य स्वलक्ष्यभ्रमरशब्दवाच्यार्थे लक्षितलक्षणेति व्यवहारः | यत्र शक्यार्थस्य परस्परासम्बद्धरूपा या लक्षणा

सा लक्षितलक्षणेति वदन्ति केचिन्नायायिकाः। यथा द्विरेफपदे शक्यार्थस्य परस्परासम्बद्धरूपा स्वघटितपदवाच्यत्वात्मिका, स्वं द्विरेफपदशक्यार्थे रेफद्वयम्, तद्धटितं पदं भ्रमर इति तद्वाच्यवाच्यत्वं मधुपे। 'द्विरेफौ रौति' इत्यत्र द्विरेफस्य शब्दकर्तृत्वान्यानुपत्त्या तात्पर्यानुपपत्त्या वा लक्षितलक्षणया मधुपो बुध्यते । एवं द्विरेफपदं तद्वोध्यं भ्रमरपदं तद्वाच्यवाच्यत्वं भ्रमररूपे अर्थे। परे तु द्विरेफ पदं रूढिशक्त्या भ्रमरबोधकः, अवयवादिप्रतीतिस्तु नास्त्येव रथन्तरादिवत्। प्रकारान्तरेणापि लक्षणा द्विधा-प्रयोजनती रूढा च। असति प्रयोजने शक्यसम्बन्धो निरूढा लक्षणा, त्वचा ज्ञातमित्यादौ यथा त्वचस्त्विगिन्द्रिये। इयं तु शक्त्यपरपर्यायैवेति बोध्यम्। सति तात्पर्ये सर्वे सर्वार्थवाचका' इति भाष्याल्लक्षणाया अभावाद् वृत्तिद्वयावच्छेदककल्पनद्वये गौरवात् जघन्यवृत्तिकल्पनाया अन्याय्यत्वाच्च न लक्षणा स्वीकार्या। गङ्गादिपदात्तीरार्थबोधस्त्वप्रसिद्धया शक्त्या एव।

व्यञ्जनारूप चित्रनम् - मुख्यार्थबाधग्रहनिरेपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणप्रसिद्धार्थ विषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाधुबुद्धसंस्काराःविशेषोव्यञ्जना नाम। "इति नागेशः।[24]

निश्शेषच्युतचन्दनस्तनतटमित्यादौ मुख्यार्थबाधाभावेऽपि अधमपदार्थपर्या लोचनया व्यङ्गयार्थप्रतीतेर्व्यञ्जना वृत्यन्तरमेव। मुख्यार्थसम्बन्धाभावद्रूढ्यादेरभावाच्च न लक्षणा। वक्त्रादीनां वैशिष्ट्यस्य ज्ञानेन प्रतिभया च उबुद्धः संस्कारः । वक्त्रादिनेत्यनेन काव्यप्रकाशकारिकापठिता ग्राह्याः तथाहि -

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ।

प्रस्तावदेशकालादेवैशिष्ट्यात् प्रतिभाजुषाम्।

योऽर्थस्यान्यार्थधीहेतुप्पारो व्यक्तिरेव सा॥[25]

इति प्रकाशादयः। वक्ता कविस्तान्निबद्धश्च बोद्धव्यः प्रतिपादनीयो. जनः । अन्तर्भावितण्यर्थत्वात्। अतो न वाच्येनाभेदः काकुः। शोकभीत्यादिभिर्ध्वनेर्विकार उच्चारयितुः शोकाद्यानुमापको जातिविशेषः । वाक्यवाच्याभ्यां सहितोऽन्यसन्निधिरिति समासेन निमित्तत्रयम्। अन्योऽत्र वक्तृबोद्धव्यभिन्नः। प्रस्तावः प्रकरणम्। देशो विजनादिः। कालो वसन्तादिः। आदिना चेष्टालीलादिहावपरिग्रहः। वैशिष्ट्यं वैलक्षण्यम्। तच्च वक्त्रादिषु प्रत्येक सम्बध्यते। पञ्चम्यर्थः सहाकारिरूपहेतुत्वम् । तच्च तदभावे व्यञ्जनानुदयाद्वोध्यम्। प्रतिभेत्यनेनेदं प्रतिपादितं नवनवोन्मे षशालिनी बुद्धिः प्रतिभा तदुक्तम् । प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मतेति।

नवनवोन्मेषो जन्मान्तरीयतद्धीजनकत्वज्ञानजन्यसंस्कारोबोधः। वक्त्रादिवैशि ष्ट्रयसहकारेण तज्जनिका च बुद्धिः प्रतिभेति फलितम् । या वामनेत्युच्यते तस्यां सत्यामेव वक्तृवैशिष्ट्यादिसत्वेऽपि व्यङ्गयप्रतीतिरिति। एवञ्च शक्तिरेव जन्मगृ हीतैवार्थबोधिका व्यञ्जना तु जन्मान्तरगृहीतापीत्यपि शक्तेरस्याभेदकत्वम्।

अत्रेदं बोध्यम् व्यञ्जनासामान्यलक्षणं अर्थविषयकः प्रतिभोबुद्धः संस्कारविशेष इत्येव नतिप्रसक्तत्वात्। दीक्षितायुक्ताद्यलक्षणामतेऽनति प्रसङ्गाय मुख्यार्थेति। मध्यमं तु स्वरूपकीर्तनम् तृतीयं तु सहकारि। एवञ्च नियन्त्रितार्थ विषयकधीजनकत्वं शब्दव्यञ्जना। वक्त्रादिवैलक्षणाहेतुका या प्रतिभाशालिनामन्या र्थधीस्तद्धेतुव्यापारत्वमर्थव्यञ्जना। यत्त्वर्थस्य न व्यञ्जकत्वं किन्तु शब्दस्यास्या स्तन्मात्रवृत्तित्वादिति तन्न।

रतिकाले विलोक्य श्री भिपद्म पितामहम् ।

रसाकुला छादयते दक्षिणं नयनं हरेः॥

इत्यादौ हरिपदेन दक्षिणनेत्रस्य सूर्यात्मकत्वं तत्सङ्कोचेन सूर्यास्तस्तेन पद्मसङ्कोचस्तेन पितामहस्य गमनं तेनाप्रतिबद्धं रतिविलसितमिति क्रमेण व्यङ्गयेषु प्रतीयमानेषु तत्तदर्थप्रतीत्युत्तरमेव व्यङ्ग्यप्रतीतेरर्थस्यापि व्यञ्जकत्वाव श्यकत्वात्।

पश्यात्र नलिनीपत्रे बलाका दृश्यतेऽचला।

रम्ये मारकते पात्रे शुक्तिरेव च निर्मला ॥

इत्यत्रापि वक्तृतात्पर्यविषयीभूतवाच्यार्थबाधाभावेऽपि तज्ज्ञानाभावेऽपि निश्चलत्वेन शुक्त्युपमया चास्तत्वं तेन तस्य निर्जनत्वं तेन तदेवावयोः सङ्केत स्थानमित्यादिक्रमेण तत्तदर्थव्यङ्गयप्रतीतेर्मुख्यार्थबाधज्ञानसत्वे तदप्रीतेश्च। अत एवाद्यं विशेषणं पदस्य च तत्तत्स्वार्थ बोधने उपरतत्वात् पुनः पुनरनुसन्धाने गौरवं तदननुभवात्। 'गतोऽस्तमर्कः' इत्यादेः शिष्येण सन्ध्यावन्दनादेः कर्तव्यत्वाशयेन गुरुं प्रति प्रयुक्ताद्वक्तृतात्पर्याभावेऽपि प्रातिवेश्यादीनामभिसरणोपक्रमादिबोधस्य वाच्यार्थधीपूर्वकस्य वाच्चार्थबाधज्ञानेऽजायमानस्य लक्षणयोपपादयितुमशक्यत्वाच्च । यत्तु 'गतोऽस्तमर्क' इत्यादौ न व्यञ्जना एकसम्बन्धिदर्शनादपरसम्बन्धि स्मरणवदुपपत्तेरिति तन्न। 'गतोऽस्तमर्क' इत्यादिश्रवणोत्तरं सन्ध्यावन्दनकर्त्तव्यत्वं मया स्मृतमित्यनुव्ययवसायाभावात् ततानुल्लेखात इदं पदमेतदर्थस्य न वाचकं नापि लक्षकं नापि स्माकरमपि तु व्यञ्जनया बोधकमिति प्रामाणिकव्यवहारेणात्यतिरिक्तत्तत्सिद्धेः। असम्बद्धस्यापि व्यङ्ग्यत्वाच्च । एतेन तदर्थानां वक्त्रादिवैशिष्ट्यज्ञानप्रतिभासहकृतमनसेव विशिष्टधीसम्भवात् चमत्कारं प्रति शाब्दस्येव मानसस्यापि चेष्टानुरोधेन हेतुतायाः क्लृप्तत्वाच्च व्यञ्जनासत्वे न मानम्। प्रतिभा च तत्पदार्थविषयसंस्कारोबोधको बुद्धिविशेष इत्यपास्तम्। व्यङ्गयोऽर्थोऽनुमेय इति त्वयुक्तमेव। विरुद्धानैकान्तिकेभ्यो व्याप्तिपक्षध मतादिनिर्णयाभावेऽपि व्यङ्गयार्थप्रतीतेः ।

किञ्च सिद्धिसत्त्वेऽपि व्यङ्गयार्थबोधदर्शनेन तत्प्रतिबध्यतावच्छेदककोटौ तभेदनिवेशेऽतिगौरवापत्त्या तज्जन्यबोधस्यातिरिक्तत्वे एव लाघवात्। अन्यथा शब्दप्रमाण्योच्छेदापत्तेरिति दिक् । अनया कटाक्षेणाभिलाषो व्यञ्जित इति।

सर्वजनप्रसिद्धरस्यां चेष्टावृत्तित्वमप्यावश्यकम् बोधकत्वस्य चेष्टायां सत्त्वेऽपि तन्निबोधकत्वं न शक्तिश्चेष्टा शक्तिरिति प्रामाणिकव्यवहाराभावात्। किन्तु तज्जन्यबोधे तज्ज्ञानस्य कारणत्वं बोध्यम्। यत्तु तत्तद्वाचकशब्दज्ञानद्वारा चेष्टया बोध इति तन्न। चेष्टया जडमूकादिव्यवहारानापत्तेः। तस्यापि जन्मान्तरेण शब्दस्मरणमित्यन्ये।

व्यञ्जनारूप चित्रनम्- वैयाकरणास्तु व्यञ्जनां स्वीकुर्वन्ति। अत एव भर्तृहरिप्रभृतिभिराचार्यैः स्फोटस्य व्यङ्ग्यत्वं प्रतिपाद्य व्यञ्जना वृत्तिः स्वीकृता। नैयायिकास्तु व्यञ्जनावृत्तिं न स्वीकुर्वन्ति ते हि लक्षणायामेव व्यञ्जनामन्तर्भावयन्ति । परमेतन्न युक्तम् । यतोहि लक्षणायां मुख्यार्थस्य बाधः आवश्यकः, व्यञ्जनायां तु न तथा। अपि च लक्षणायामप्रसिद्धार्थस्य बोधः व्यञ्जनायां तु प्रसिद्धार्थस्यापि बोधः। लक्षणायां वक्तृ-श्रोतृभेदातन्नार्थभेदः। व्यञ्जनायां तु वक्तृश्रोतृ भेदादर्थभेदः। अत एव वैयाकरणसिद्धान्तमञ्जूषायां व्यञ्जनायाः स्वरूपं प्रतिपादयता महावैयाकरणेन श्रीमता नागेशभट्टेन प्रत्यपादि-मुख्यार्थबाधनिरपेक्ष इत्याधुक्तमेव।

तथा हि- "गतोऽस्तमर्कः" इत्यादिवाक्ये "अर्कः अस्तं गत" इत्यस्य मुख्यार्थस्य बाधाभावेऽपि ब्रह्मचारिणं प्रति गुरुणा प्रोक्तस्यास्य वाक्यस्यार्थः "सन्ध्या वन्दनकालः समुपागत" इति। परञ्च वक्तृभेदाच्चोररूपवक्त्रोद्यमानाच्चौरकर्मकालः इति भिन्नार्थबोधः साहित्यकानां कृते तु व्यञ्जनावृत्तिर्हृदयमेव । अतो वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य प्राधान्यं काव्यस्य उत्तमत्वं साहित्यिकैरङ्गीक्रियते। वाच्यार्थस्य गौणत्वे तु काव्यस्य मध्यकाव्यत्वम्। व्यङ्ग्यार्थस्य राहित्ये तु काव्यस्य अधमत्वं तैरङ्गीक्रियते। अस्मिन् विषये काव्यप्रकाशादौ विस्तृतं प्रोक्तं, प्रकृते च तस्य विवेचनं नोपयुक्तम्।

**सन्दर्भ ग्रन्था-**


1. परमलघुमञ्जूषायां शक्तिनिर्णयप्रकरणे
2. परमलघुमञ्जूषायां शक्तिनिर्णयप्रकरणे
3. वाक्यपदीयम् पदकाण्डम् सम्बन्धसमुद्देशः - १
4. वाक्यपदीयम् पदकाण्डम् सम्बन्धसमुद्देशः कारिका – २६
5. वाक्यपदीयम् ब्रह्मकाण्डम् कारिका - ५५
6. वाक्यपदीयम् पदकाण्डम् कारिका -६
7. परमलधुमञ्जूषाशक्तिविचार:
8. न्या. सि, मुक्ता. शब्दशब्दखण्डे
9. वैयाकरणभूषणसार: सुबर्थनिर्णयः कारिका - २४ ।

10. शब्दशक्तिप्रकाशिका कारिका - २०

11. शब्दशक्तिप्रकाशिकायाम् कारिका - १६

12. शब्दशक्तिप्रकाशिकायाम् कारिका – १७

13. शब्दशक्तिप्रकाशिका कारिका - १८

14. शब्दशक्तिप्रकाशिकायाम् कारिका - १६

15. वाक्यपदीयम् वाक्यकाण्डकारिका -३१७

16. वाक्यपदीयम् वाक्यकाण्डकारिका -३१८

17. परमलघुमञ्जूषायाम्

18. वैयाकरणभूषणसार शक्तिनिर्णय कारिका सं. -37

19. परमलघुमञ्जूषा-शक्तिनिरूपम् पृष्ठ सं. 17

20. परमलघुमजूषा-शक्तिनिरूपम पृष्ठ सं. 26

21. परमलघुमजूषा-शक्तिनिरूपम्...

22. शब्दशक्तिप्रकाशिका कारिका -२४

23. शब्दशक्तिप्रकाशिका कारिका - २५

24. वैयाकरणसिद्धान्तमञ्जूषा व्यञ्जनानिरुपणम् –

25. काव्यप्रकाश - तृतीयोल्लास -२१